# गुणस्वरूपविचारः

**मुनीशकुमारमिश्रः**

शोधच्छात्रः, वैदिकदर्शनविभागः, काशीहिन्दूविश्वविद्यालयः

द्रव्यपदार्थनिरूपणानन्तरं गुणपदार्थस्य निरूपणं महर्षिणा कणादेन सूत्रग्रन्थे कृतम्। द्रव्यनिरूपणानन्तरं कर्मसामान्यादिनिरूपणात्पूर्वं गुणनिरूपणे किं बीजमिति जिज्ञासासमाधानाय शङ्करमिश्रेण उपस्कारग्रन्थे कथितं यत् **''गुणत्वेन रूपेण गुणानां सर्वद्रव्याश्रितत्त्वं द्रव्याभिव्यङ्गत्त्वं द्रव्याभिव्यञ्जकञ्चेति द्रव्यानन्तरं गुणानामुपदेशं विभागञ्चाह''**[१] इति। गुणगुणिनो भेदः धर्मधर्मिणो भेदश्च वैशेषिकपरम्पराया आधारभूतसिद्धान्तत्वात् गुणी धर्मी (द्रव्यस्य) वा निरूपणानन्तरं गुणानां निरूपणस्य प्रसङ्गिकत्वात् षट्पदार्थेषु मध्ये द्वितीयपदार्थरूपेण गुणपरिगणनं कृतं सूत्रकारेण।

महर्षिणा कणादेन **''द्रव्याश्रयगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्''**[२] इति गुणलक्षणं कृतम्। आचार्यप्रशस्तपादेनापि[३] सूत्रकारवचनसम्मतं गुणस्य लक्षणं भाष्ये प्रतिपादितम्। न्यायलीलावतीकारेण **''सामान्यवानचलनात्मकः समवायिकारणताहीनो गुणः''**[४] इति विशिष्टं लक्षणं कृतम्। विश्वनाथेन[५] केशवमिश्रेण[६] चापि वल्लभाचार्यैः इव लक्षणं प्रतिपादितम्। शङ्करमिश्रेण कणादरहस्ये गुणस्य जातिघटिते द्वे लक्षणे प्रतिपादिते।[७] आचार्यकौण्डभट्टेन[८] दीपिकाकारेण[९] च यल्लक्षणं कृतं तत्तु जातिघटितमेव। लक्षणानां विवेचनाद् ज्ञायते यत् कौण्डभट्टोपरि शङ्करमिश्रस्य प्रभावो वर्तते। कणादरहस्यमिव न्यायलीलावतीकण्ठाभरणे[१०] वैशेषिकसूत्रोपस्कारेऽपि[११] मिश्रेण गुणस्य जातिघटितं लक्षणं प्रतिपादितम्।

सूत्रकारः सूत्रग्रन्थे[१२] सप्तदशगुणानामेवोल्लेखं कृतवान्, किन्तु परवर्तिभाष्यकाराः प्रशस्तपादादयः[१३] सूत्रस्थ 'च' शब्देन लोकप्रसिद्धसप्तगुणानां ग्रहणं कृतवन्तः, तस्माद् वैशेषिकशास्त्रे गुणानां चतुर्विंशतिसंख्याः सर्वमतसिद्धाः। अतः कणादरहस्ये ग्रन्थकारेणापि कथितं यत् सप्तदशगुणाः सूत्रकारेण कण्ठोक्ताः तथा च 'च'शब्दसमुदितात् सप्तगुणानां ग्रहणत्वात् चतुर्विंशतिगुणाः प्रसिद्धाः। यथोक्तम्- **''तत्र गुणाः रूपरस-गन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदःखेच्छाद्वेषप्रयत्नाः कण्ठोक्ताः सप्तदश, चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्तेति चतुर्विंशति''**[१४] इति।

अत्र गुणनिरूपणक्रमे ध्यातव्यमस्ति यत् प्रशस्तपादादयः आचार्या अन्तिमगुणरूपेण शब्दस्य परिगणनं कृतवन्तः, शङ्करमिश्रोऽपि शब्दम् अन्तिमे परिगणितवान्। किन्त्वन्नम्भट्टेन केशवमिश्रेण च संस्कारस्यान्तिमगुणरूपेण परिगणनं कृतम्। सर्वेषु मतेषु रूपादिपरत्वपर्यन्तं तु समानं किन्तु भाष्यादौ परत्वापरत्वानन्तरं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां क्रमो वर्तते, परन्तु तर्कसंग्रहादिषु परत्वापरत्वानन्तरं गुरुत्वद्रवत्वस्नेहशब्दानां क्रमो वर्तते। तदनन्तरं बुद्ध्यादीनां वर्णनमस्ति। स्पष्टार्थं तुलनात्मकसारिणि द्रष्टव्या-

| **प्रशस्तपादादिमतसम्मतक्रमः** | **अन्नम्भट्टादिमतसम्मतक्रमः** |
|---|---|
| १. रूप् | १. रूपम् |
| २. रसः | २. रसः |
| ३. गन्धः | ३. गन्धः |
| ४. स्पर्शः | ४. स्पर्शः |
| ५. संख्या | ५. संख्या |
| ६. परिमाणम् | ६. परिमाणम् |

| | |
|---|---|
| ७. पृथक्त्वम् | ७. पृथक्त्वम् |
| ८. संयोग: | ८. संयोग: |
| ९. विभाग: | ९. विभाग: |
| १०. परत्वम् | १०. परत्वम् |
| ११. परत्वम् | ११. अपरत्वम् |
| १२. बुद्धि: | १२. गुरुत्वम् |
| १३. सुखम् | १३. द्रवत्वम् |
| १४. दु:खम् | १४. स्नेह: |
| १५. इच्छा | १५. शब्द: |
| १६. द्वेष: | १६. बुद्धि: |
| १७. प्रयत्न: | १७. सुखम् |
| १८. गुरुत्वम् | १८. दु:खम् |
| १९. द्रवत्वम् | १९. इच्छा |
| २०. स्नेह: | २०. द्वेष: |
| २१. संस्कार: | २१. प्रयत्न: |
| २२. धर्म: | २२. धर्म: |
| २३. अधर्म: | २३. अधर्म: |
| २४. शब्द: | २४. संस्कार: |

अत्र गुणनिरूपणे शङ्करमिश्रेण चतुर्विंशतिसंख्यानिश्चयार्थं विवेचनं न कृतं यथा पदार्थनिरूपणे षट्संख्यानिर्धारणाय विवेचितम्। किन्त्वन्यग्रन्थेषु कथमेते चतुर्विंशति एव गुणा: इति विषये विशद्विवेचन् प्राप्यते। अत्रेयमाशङ्का जायते यद्धर्माधर्मयो अदृष्टशब्देन परिगणितत्वात् यदि चतुर्विंशतिसंख्याया: पूर्ति: क्रियते तर्हि संस्कारपदेनापि वेगो भावनास्थितिस्थापकानां ग्रहणं भवेत्, अत: न चतुर्विंशतिगुणा:, अपितु षड्विंशतिसंख्याका: गुणा: सन्ति। अस्मिन्विषये प्रचीना:[१५] समाधानं कुर्वन्ति यत् संस्कारजातित्वेन[१६] संस्कारस्यैकरूपेण परिगणनम्, अदृष्टत्वस्य जातित्वाभावान्नाऽदृष्टत्वेन धर्माधर्मयो: ग्रहणम्। अत: तयो: पृथक्त्वेन परिगणनम्। अदृष्टत्वञ्च न जातिरिति विषये किं प्रमाणम्? तदुच्यते उदयनाचार्येण- परस्परं विरुद्धं विहितनिषिद्धकर्म अदृष्टत्वात् जायते, तथा च परस्परविरुद्धं सुखदु:खञ्च तस्य परिणाम:। अतोऽननुगतत्वाददृष्टत्वं न जाति:।[१७] किरणावलीग्रन्थस्य टीकाकारेणाप्येवमेव प्रतिपादितम्, यथा- **''सुखदुःखे धर्माधर्मयोः कार्ये विहितनिषिद्धक्रिये च कारणे इति न कार्यकारणयोरैक्यरूप्यं यदनुरोधाज्जातिः कल्प्यते''**[१८] इति। व्योमशिवाचार्येणापि[१९] धर्माधर्मयो अदृष्टशब्देन परिगणितम्।

अदृष्टविषये नवीनानां मते भेद: दृश्यते, तेषां मतेऽदृष्टत्वं जाति:। अतो नवीनानां मते गुणत्वसाक्षाद्व्याप्यजातिमत्त्वेनैव गुणविभजने न किमपि प्रमाणम्। यद्यदृष्टत्वं न जाति: तर्हि संस्कारत्वमपि न जाति:। अदृष्टत्वजाते: सत्त्वात्कथं चतुर्विंशतिगुणा इति विषये द्रव्यकिरणावल्यां जगदीशतर्कालङ्कार: कथयति- **''तत्रानुगतस्याऽदृष्टत्वस्य मिथ्याज्ञान-वासनादिजन्यतावच्छेदकतया सिद्धस्य सत्त्वेऽपि अदृष्टपदं धर्मत्वाऽधर्मत्वाभ्यामेव विभिन्नरूपाभ्यां धर्माधर्मता समर्थकम्''**[२०] इति। अस्मिन् विषये भट्टवादीन्द्रस्य मतं समन्वयात्मकत्वादधिकं तर्कसङ्गतं प्रतीयते। यथा- **''यदि तु धर्माऽधर्मयोरप्येको धर्मः, तमुपजीव्य वा अदृष्टत्वानुमानं सम्भाव्यते, ततो न काचन क्षतिः, धर्माऽधर्मत्वभेदविवक्षायां गुणचतुर्विंशतित्वनिर्वाहात्। अदृष्टत्वेनैकत्वविवक्षायान्तु गुणत्रयो विंशतित्वं सामान्यविशेषगुणत्वाभ्यां गुणद्वित्वमेव न सिद्धान्तक्षतिमावहन्ति''**[२१] इति।

यद्यपि सूत्रकारेण कण्ठतः सप्तदशगुणानामेव निर्देशः कृतः तथापि सूत्रान्तेऽनुक्तगुणसमुच्चायार्थं 'च' शब्दप्रयोगेन सप्तगुणानां ग्रहणात् चतुर्विंशतिगुणाः सिद्धमिति प्रशस्तपादमतम्। यथा- **''च शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्काराऽदृष्टशब्दाः सप्तैव इत्येवं चतुर्विंशतिगुणाः''**[२२]। अस्य भाष्यवचनस्य व्याख्यानं कुर्वता श्रीधराचार्येण **''च शब्देन अनुक्ताः गुणत्वेन लोके प्रसिद्धाः गुरुत्वादयः सप्तसमुच्चिताः''**[२३] इत्युक्तम्। उयनाचार्यवर्धमानोपाध्यायमतयो अभ्युपगमसिद्धान्तेन[२४] तेषां ग्रहणम्।

अत्रेदं विचारणीयमस्ति यत् सूत्रकारेण स्वयं गुरुत्वस्य (१.१.२९, ५.१.७, ५.१.१८, ५.२.३) इत्यादिसूत्रेषु, द्रवत्वस्य (२.१.६७, ५.२.४) इत्यादिसूत्रयोः, स्नेहस्य २.१.२ सूत्रे, संस्कारस्य (५.१.१७-१८, ९.२.६-७, ९.२.१०) इत्यादिसूत्रेषु, धर्माधर्मयोः (५.१.१५, ५.२.२, ५.२.७, ५.२.१३, ५.२.१७, ६.१.१२, ६.२.१-२, ६.२.१४, ९.२.९, ९.२.१३) इत्यादिसूत्रेषु तथा च शब्दस्य (२.१.२४, २.१.२७, २.२.२१) इत्यादिसूत्रेषु कुत्रचित् स्पष्टरूपेण कुत्रचिच्चाऽर्थलभ्यरूपेण निर्देशः कृतः तर्ह्येतेषां सिद्ध्यर्थं लोकव्यवहारसिद्धस्याऽभ्युपगमसिद्धान्तानुसरणं कथं युक्तिसङ्गतमिति विचारणीयो विषयोऽस्ति।[२५]

लोकप्रसिद्धशौर्यादिगुणानामपि चतुर्विंशतिगुणेष्वेवान्तर्भावः। यथोक्तं श्रीधराचार्येण- **''ये तु शौर्योदार्यदाक्षिण्यौग्र्यादयः,तेऽत्रैवान्तर्भवन्ति। शौर्यं बलवतोऽपि परस्य पराजयाय प्रत्युत्साहः। स च प्रयत्नविशेष एव। सततं सन्मार्गवर्त्तिनी बुद्धिः औदार्यम्। परदुःखप्रहेणेच्छा कारुण्यम्। तत्त्वभिनिवेशिनी बुद्धिः दाक्षिण्यम्। औग्र्यमात्मन्युत्कर्षप्रत्ययः इत्येवमादिः''**[२६] इति। न्यायलीलावत्यामपि इत्थमेव वर्णनमस्ति।[२७]

शङ्करमिश्रेण कणादरहस्ये गुणस्य द्वे लक्षणे प्रतिपादिते। प्रथमं तावत्– **''नित्यद्रव्यवृत्तिवृत्तिसत्तासाक्षाद्व्याप्यजातिर्गुणत्वं तद्वत्त्वम्''**[२८] इति। उक्तलक्षणं मिश्रमते न समीचीनम्, यतोहि नित्यद्रव्यवृत्तिपदार्थः न गुणमात्रमपितु कर्माऽपि वर्तते। तस्मात् कर्मवृत्तिसत्तासाक्षाद्व्याप्यजातिः कर्मत्वजातिः, तादृशजातिमत्त्वस्य कर्मणि सत्त्वादतिव्याप्तिः। अत **''विभुवृत्तिवृत्तिसत्तासाक्षाद्व्याप्यजातिर्वा''**[२९] इति द्वितीयं लक्षणमुपात्तम्। द्वितीयलक्षणेऽपि प्रथमलक्षणमिव 'गुणत्वं तद्वत्त्वम्' योजनीयम्। तथा च लक्षणस्वरूपं तावत् 'विभुवृत्तिवृत्तिसत्तासाक्षाद्व्याप्यजातिर्गुणत्वं तद्वत्त्वम्' इति फलितम्। अस्मिन्लक्षणे कर्मण्यतिव्याप्तिवारणाय विभुवृत्तिपदस्य निवेशः, यतोहि विभुद्रव्येषु कर्म न विद्यते। अतो विभुवृत्तिपदार्थः गुणपदार्थः तद्वृत्तिसत्तासाक्षाद्व्याप्यजातिः गुणत्वजातिः, तादृशजातिमत्त्वस्य गुणे सत्त्वाद्भवति लक्षणसमन्वयः। सामान्यादावतिव्याप्तिवारणाय सत्तासाक्षाद्व्याप्यजातिपदस्य निवेशः, यतोहि सत्ता द्रव्यगुणकर्ममात्रेष्वेव वर्तते, तद्व्याप्यजातिः द्रव्यत्वं गुणत्वं कमत्वञ्च। अतो न लक्षणे कोऽपि दोषः।

गुणत्वजातौ किं मानमिति निवृत्तौ ग्रन्थकारेण गुणत्वजातिसाधकमनुमानमपि प्रदर्शितम्। यथा- **''द्रव्यत्वं कर्मावृत्तिसत्तासाक्षाद्व्याप्यजातिभिन्नं मेयत्वात्, घटवत्''**[३०] इति। अस्मिननुमाने द्रव्यत्वं पक्षः, कर्मावृत्तिसत्तासाक्षाद्व्याप्यजातिभिन्नत्वं साध्यम्, मेयत्वं हेतुः, घटो दृष्टान्तः। अत्र साध्ये कर्मावृत्तिपदोपादानात् कर्मत्वजातेः वारणम्, तथा च कर्मावृत्तिसत्तासाक्षाद्व्याप्यजातिः द्रव्यत्वजातिः, तद्भिन्नत्वं गुणत्वम्, अतो गुणत्वं सिद्धम्।

अत्रेयमाशङ्का जायते यत् दृष्टान्तो द्रव्यत्वभिन्नत्वेनैव सिद्धः, अर्थात् यथा द्रव्यं ज्ञानविषयत्वं तथैव सामान्यादिद्रव्यभिन्नपदार्थेष्वपि ज्ञानविषयत्वमस्ति। मिश्रमते उक्तदोषस्य सत्त्वेऽपि न कापि हानिः, यतोहि दृष्टान्तस्य केवलान्वयित्वात्। अनुमाने द्वौ घटकौ विद्येते, व्याप्तिः पक्षधर्मता च। कुत्रचिद् व्याप्तिबलादनुमितिर्जायते, कुत्रचिच्च पक्षधर्मतात्वेनानुमिति र्जायते। अतः मिश्रेण पक्षधर्मताबलादत्र गुणत्वजातिसिद्धिरित्युक्तम्।[३१]

गुणत्वजात्यस्वीकारे विपक्षे बाधकप्रमाणाभावो वर्तते, अत एव गुणत्वजातेरावश्यकता नास्तीति न वक्तुं शक्यते, यतोहि यदि गुणत्वजातिसिद्धिः न मन्यते तर्हि संयोगविभागयोः समवायिकारणताऽसमवायिकारणताशून्यः यतः सामान्यवान् गुणः तद्वृत्तिकारणतावच्छेदको कश्चिदनुगतो धर्मः न स्यात्, यतोहि संयोगविभागयोः समवायिकारणं

द्रव्यं भवति तथा चासमवायिकारणं कर्म भवति। अनेन संयोगविभागोभयसमवायिकारणत्वासमवायिकारण-त्वशून्ये सामान्यवत् कारणं गुण एव भविष्यति। तद्वृत्तिकारणताया: अवच्छेदक: गुणत्वजातिर्भवति। यदि गुणत्वं न स्वीक्रियते तदा तदवच्छेदकानुगतं विहायाऽनेकत्वं रूपत्वं रसत्वमित्यादय: स्यु:।[३२]

इदमपि न वाच्यं यत् गुणेषु कारणता नास्तीति न वाच्यम्, यस्यानुगतधर्मा-वच्छेदकत्वेन गुणत्वजातिसिद्धिर्जायते, यतोहि चतुर्विंशतिगुणा: स्वस्वकार्यं प्रति कारणानि भवन्ति। सूत्रग्रन्थे भाष्यग्रन्थे वा द्वित्वद्विपृथक्त्वादीनामकारणत्वं यदुक्तम्, तत्कारणताया: निषेध: कश्चित्कार्यविशेषापेक्षया कृतो न तु स्वविषयकज्ञानापेक्षया। अर्थाद् द्वित्वं द्विपृथक्त्वञ्च किञ्चित्कार्यं प्रति यावदेव कारणं न भवत:, किन्तु स्वविषयजन्यज्ञानं प्रति कारणं भवत एव। प्रत्येकं विषयं स्वज्ञानस्य कारणं भवति। अनेन गुणनिष्ठकारणतावच्छेदकत्वेनापि गुणत्वजातिसिद्धि:।[३३]

'रूपं रूपत्वतद्व्याप्येतरसत्तासाक्षाद्व्याप्यजातिमत् जातिमत्त्वात् घटादिवत्' इत्यनुमाने-नापि ग्रन्थकारेण गुणत्वजातिसिद्धि: कृता, यतोहि रूपे रूपत्वनीलत्वेतरगुणत्वजातिरपि वर्तते, सा सत्तासाक्षाद्व्याप्याऽपि भवति। द्रव्यत्वं गुणत्वं कर्मत्वञ्च सत्तासाक्षाद्व्याप्यजाति:, द्रव्यत्वं द्रव्ये, कर्मत्वं कर्मणि तथा गुणत्वं गुणे तिष्ठति। अत: रूपवृत्तिसत्तासाक्षाद्व्याप्यजाति: गुणत्वमेवास्ति। ग्रन्थकारमते इत्थमेव रसगन्धादीन् अपि पक्षीकृत्य गुणत्वजातिसिद्धि: कर्तुं शक्यते।[३४] अथवा 'कर्मत्वं द्रव्यावृत्तिसत्तासाक्षाद्व्याजातिभिन्नं जातित्वात् घटत्वादिवत्' अथवा 'रूपत्वंस्वात्यन्ताभावसमानाधिकरण-सत्ताव्याप्यजातिव्याप्यं कर्मत्वान्याकाशावृत्तिजातित्वात् घटत्वादिवत्' अथवा 'गुणमुपदेशसहकृतेन्द्रियग्राह्यमेव पद्मरागत्वादिवत्' इत्याद्यनुमानैरपि गुणत्वजातिसिद्धिर्जायते।[३५]

शङ्करमिश्रेण गुणत्वमुपदेशसहकृतेन्द्रियग्राह्यमेव पद्मरागत्वादित्यनुमानेन गुणत्वस्य प्रत्यक्षत: सिद्धि: कृता । यथा- 'प्रभाविशेषाश्रयोमणि: पद्मराग:' उपदेशसहकृतं यदिन्द्रियं तेनेवेन्द्रियेणैव पद्मरागत्वं गृह्यते तथैव 'कर्मान्यत्वे सति सामान्यवान् गुण:' इत्युपदेशसहकृतेनैव चक्षुरिन्द्रिणैव गुणत्वमपि गृह्यत एव। अत्रेयमाशङ्का जायते यत् पद्मरागत्वादिग्रहणे उपदेशस्यापेक्षा नास्ति, अपितु पद्मरागपदस्यार्थमात्रेणैव तद् बोधो जायते, अत एव यद्पद्मरागत्वस्य दृष्टान्तत्वं तन्न समीचीन्, दृष्टान्तद्राष्टान्तिकयोर्मध्ये भेदत्वात्। मिश्र: खण्डनं कुर्वन् कथयति- यदि तत्पदवाच्यमात्रेण पद्मरागत्वादे: ग्रहणं सम्भवति तर्हि तावदेव तत्पदवाच्यमात्रेण गुणत्वग्रहणे न कोऽपि विरोध:। तस्माद् गुणत्वजातिसिद्धि:।[३६]

उपरि कर्मान्यत्वे सतीत्याद्युपदेशप्रसङ्गे कर्मान्यत्वं यदुक्तं तन्न कस्यापि व्यावृत्तिं करोति, अत: तद्व्यर्थम्? मिश्रमते उक्ता शङ्का निर्मूला, यतोहि कर्मण: गुणभिन्नत्वं द्विप्रकारेण सिद्धम्। प्रथमस्तु चलतीति प्रत्ययबलात्, यतोहि चलतीत्यादिप्रतीति: कर्मविषये एव भवति, गुणे तादृशप्रतीतेरभावो विद्यते। द्वितीयस्तु कर्म संयोगविभागयोरसमवायिकारणं भवति किन्तु गुणो नास्ति, तस्मात् कर्मभिन्नो गुण: सिद्ध:। कर्मण: व्यावृति: अत एवाश्यकमस्ति, यतोहि तद्व्यावृते सम्यक्तया प्रतिपादनाय कर्मभिन्नत्वस्य निवेश:। रूपादीनां च गुणभिन्नत्वमसिद्धम्। अत एव गुणलक्षणे रूपादिभिन्नत्वमिति विशेषणोपादानं न कर्तुं शक्यते, यतोहि रूपादिभिन्नत्वविशेषणोपादाने भागासिद्धिप्रसङ्गापत्ति: स्यात्। यथोक्तम्- **''रूपादीनां च गुणभिन्नत्वासिद्धेर्गुणलक्षणे रूपान्यत्वादिना विशषणे भागासिद्धिप्रसङ्गात्''**[३७] इति।

## संदर्भ ग्रंथ सूची


१. उपस्कार:, पृ. ३३।
२. वै.सू. १.१.१६।
३. रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्त्वं निर्गुणत्वं निक्रियत्वम- प्र. पा. भा., पृ. २२६।
४. न्या. ली., पृ. ७५३-७५४
५. अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणा:- भा. परि., कारि. ८६।

६. सामान्यवान् असमायिकारणं अस्पन्दात्मा गुणः- तर्कभाषा, पृ. ३७८।
७. क. र., पृ. २८।
८. त. प्र., पृ. ८६। प. दी., पृ. ३७।
९. त. दी. (त. सं.) पृ. २१।
१०. न्या. ली. क. भ., पृ. ७५३-७५४
११. उपस्कारः, पृ. ५४।
१२. वै.सू. १.१.६।
१३. प्र. पा. भा., पृ. २६-२७। उप., पृ. ३४-३६। भा.परि., कारि. ५। न्या.सि. मु., पृ. ५३।
१४. क. र., पृ. २९।
१५. न्या. क., पृ. २८। व्यो., पृ. ५०। किर., पृ. ११६। किर. प्र., पृ. ११८।
१६. न्या. क., पृ. २८। किर., पृ. ११७।
१७. किर., पृ. ११७।
१८. कि. प्र., पृ. ११५।
१९. व्योम., पृ. ५०।
२०. सूक्तिटीका, पृ. ४७।
२१. द्र. कि. टी., पृ. ६३५।
२२. प्र. पा. भा., पृ. २७।
२३. न्या. क., पृ. २७।
२४. (क) अभ्युपगमसिद्धान्तन्यायेन अन्येऽपि सप्तसिद्धगुणभावाः, तत्र तत्र तेषां व्युत्पादानात्- किर, पृ. २०।
२५. (ख) साक्षादसूत्रितत्त्वेऽपि समानतन्त्राऽभिहितत्त्वेन अभ्युपगम्यमानत्वादित्यर्थः- कि. प्र., पृ. २०।
२६. वै.द. ए. अ., पृ. ८९।
२७. न्या. क., पृ. २७-२८।
२८. न्या. ली., पृ. ६७३-६७७।
२९. क. र., पृ. २८।
३०. तदेव।
३१. तदेव।
३२. तदेव।
३३. क. र., पृ. २८।
३४. तदेव।
३५. वं रसादिकं पक्षीकृत्वा वाच्यम्- क. र., पृ. २८।
३६. क. र., पृ. २८।
३७. तदेव।
३८. तदेव, पृ २९।